मुन्मत्तचित्तत्वमुदर्द्दितत्वमर्द्दिताकृतिकरणञ्च व्याधेः स्वप्ने च दर्शनमभीक्ष्णं भ्रान्तचलितानवस्थितानवस्थितानाञ्च रूपाणामप्रशस्तानाञ्च तिलपीड़कचक्राधिरोहणं वातकुण्डलिकाभिश्चोन्मथनं निमज्जनं कलुषाणामम्भसामावर्त्तेषु चक्षुषोश्चापसर्पणमिति दोषनिमित्तानामुन्मादानां पूर्ब्बरूपाणि" ॥

अत्र वातादिभेदेनास्य लक्षणानि यथा,—

"ततोऽनन्तरमुन्मादाभिनिर्वृत्तिस्तत्रेदमुन्मादविज्ञानं भवति। तद्यथा,—परिसर्पणमक्षिभ्रुवौष्ठांस-हनु-हस्त-पादविक्षेपणमकस्मादनियतानाञ्च सततङ्गिरामुत्सर्गः फेनागमनमास्यात् स्मित-हसित-नृत्य-गीत-वादित्र-प्रयोगाश्चास्थाने वीणा-वंश-शङ्ख-शम्यातालशब्दानुकरणमसाम्ना। यानमयानैरलङ्करणमनलङ्कारिकैर्द्रव्यैर्लोभोऽभ्यवहार्य्येष्वलब्धेषु। लब्धेषु चावमानस्तीव्रं मात्सर्य्यं कार्श्यं पारुष्यमुत्पिण्डितारुणाक्षता वातोपशय-विपर्य्यासानुपशयिता चेति वातोन्मादलिङ्गानि भवन्ति॥

अमर्षः क्रोध-संरम्भश्चास्थाने शस्त्रलोष्टकाष्ठ-मुष्टिभिरभिद्रवणं स्वेषां परेषां प्रच्छाय-शीतोदकान्नाभिलाषः। सन्तापोऽतिवेलम्। ताम्रहरित-हारिद्रसंरब्धाक्षिता पित्तोपशयविपर्य्यासादनुपशयिता चेति पित्तोन्मादलिङ्गानि भवन्ति॥

स्थानमेकदेशे तूष्णीम्भावोऽल्पशः संक्रमणं लालाशिङ्घाणकाप्रस्रवणमनन्नाभिलाषो रहस्कामता बीभत्सत्वं शौचद्वेषः स्वप्न-निद्रता श्वयथुरानने शुक्ल-स्तिमितमलोपदिग्धाक्षता श्लेष्मोपशयविपर्य्यासादनुपशयिता चेति श्लेष्मोन्मादलिङ्गानि भवन्ति। त्रिदोषलिङ्गसन्निपाते तु सान्निपातिकं विद्यात्। तमसाध्यमित्याचक्षते कुशलाः" ॥

साधारणसाधनविधिर्यथा।

"साध्यानान्तु त्रयाणां साधनानि भवन्ति। तद्यथा,—स्नेह-स्वेद-वमन-विरेचनास्थापनानुवासनोपशमननस्तः कर्म्म-धूप-धूम-पानाञ्जनावपीड़-प्रधमनाभ्यङ्ग-प्रदेह-परिषेकानुलेपन-बध-बन्धनावरोधन-वित्रासन-विस्मापन-विस्मारणापतर्पण-शिराव्यधनानि॥

भोजनविधानञ्च यथास्वं युक्त्या यच्चान्यदपि किञ्चिन्निदानविपरीतमौषधं कार्य्यन्तत्स्यादिति। उन्मादान् दोषजान् साध्यान् साधयेद्भिषगुत्तमः। अनेन विधियुक्तेन कर्म्मणा यत्प्रकीर्त्तितम्"॥ इति॥

आगन्तुरुन्मादो यथा।

"यस्तु दोषनिमित्तेभ्य उन्मादेभ्यः समुत्थान-पूर्ब्बरूपलिङ्गविशेषसमन्वितो भवत्युन्मादस्तमागन्तुमाचक्षते॥

केचित् पुनः पूर्ब्बकृतं कर्म्माप्रशस्तमिच्छन्ति। तस्य निमित्तं प्रज्ञापराध एवेति भगवान् पुनर्व्वसुरात्रेय उवाच॥

प्रज्ञापराधाद्ध्ययं देवर्षि-पितृ-गन्धर्व्व-यक्ष-राक्षस-पिशाच-गुरु-वृद्ध-सिद्धाचार्य्य-पूज्यानवमत्याहितान्याचरति अन्यद्वा किञ्चित् कर्म्माप्रशस्तमारभते। तमात्मनोहतमुपघ्नन्तो देवादयः कुर्व्वन्त्युन्मत्तम्" ॥

आगन्तून्मादस्य पूर्ब्बरूपाणि यथा।

"तत्र देवादिप्रकोपनिमित्तेनागन्तून्मादेन पुरस्कृतस्येमानि पूर्ब्बरूपाणि। तद्यथा—देव-गो-ब्राह्मण-तपस्विनां हिंसारुचित्वं कोपनत्वं नृशंसाभिप्रायता अरतिरोजो-वर्णच्छाया-बल-वपुषाञ्चोपतप्तिः स्वप्ने च देवादिभिरभिभर्त्सनं प्रवर्त्तनञ्चेति ततोऽन्तरमुन्मादाभिनिर्वृत्तिः॥

तत्रायमुन्मादकराणां भूतानामुन्मादयिष्यतामारम्भविशेषो भवति। तद्यथा। अवलोकयन्तो देवा जनयन्त्युन्मादं गुरुवृद्धसिद्धर्षयोऽभिशपन्तः पितरो धर्षयन्तः स्पृशन्तो गन्धर्व्वाः समाविशन्तो यक्षराक्षसास्त्वात्मगन्धमाघ्रापयन्तः पिशाचाः पुनरारुह्य वाहयन्तः॥

तस्येमानि रूपाणि भवन्ति। तद्यथा। अमर्त्त्यबल-वीर्य्य-पौरुष-पराक्रम-ग्रहण-धारण-स्मरण-वचन-ज्ञान-विज्ञानान्यनियतश्चोन्मादकालः।

उन्मादयिष्यतामपि खलु देवर्षि-पितृ-गन्धर्व्व-यक्ष-राक्षस-पिशाचानां गुरुवृद्धसिद्धानां वा एष्वन्तरेष्वभिगमनीयाः पुरुषा भवन्ति। तद्यथा—पापस्य कर्म्मणः समारम्भे पूर्ब्बकृतस्य वा कर्म्मणः परिणामकाले एकस्य वा शून्यगृहवासे चतुष्पथाधिष्ठाने वा सन्ध्यावेलायामप्रयतभावे वा पर्ब्बसन्धिषु वा मिथुनीभावे रजस्वलाभिगमने वा विगुणे वाऽध्ययन-बलि-मङ्गल-होम-प्रयोगे नियमव्रतब्रह्मचर्य्ये वा महाहवे वा देव-कुल-पुर-विनाशे वा महाग्रहोपगमने वा स्त्रिया प्रजननकाले विविधभूताशुचिसंस्पर्शने वा वमनरुधिर-स्रावाशुचेरप्रयतस्य चैत्य-देवायतनाभिगमने वा मांस-मधु तिल-गुड़-मद्योच्छिष्टे वा दिग्वाससि वा निशि नगर-निगम-चतुष्पथे पवनश्मशानाभिगमने वा द्विज-गुरु-सुर-यति-पूज्याभिधर्षणे वा धर्म्माख्यानव्यतिक्रमे वा न्यस्यकर्म्मणोऽप्रशस्तस्यारम्भे वा इत्याघातकालाः व्याख्याता भवन्ति॥

त्रिविधन्तु खलून्मादकराणां भूतानामुन्मादने प्रयोजनम्भवति। तद्यथा। हिंसारतिरभ्यर्च्चनञ्चेति। तेषां तत्प्रयोजनविशेषमुन्मत्ताचारविशेषलक्षणैर्विद्यात्। तत्र हिंसार्थमुन्माद्यमानोऽग्निं प्रविशत्यप्सु वा निमज्जति स्थलात् श्वभ्रे निपतति शस्त्र-कषा-काष्ठ-लोष्ट-मुष्टिभिर्हन्त्यात्मानमन्यच्च प्राणबधार्थमारभते। तमसाध्यं विद्यात्। साध्यौ पुनर्द्वावितरौ। तयोः साधनानि। मन्त्रौषधि-मणि-मङ्गल-बल्युपहार-होम-नियम-प्रायश्चित्तोपवास-स्वस्त्ययन-प्रणिपात-गमनादीन्येवमेते पञ्चोन्मादाः व्याख्याता भवन्ति" ॥

"नैव देवा न गन्धर्व्वा न पिशाचा न राक्षसाः।
न चान्ये स्वयमक्लिष्टमुपक्लिश्यन्ति मानवम्॥
ये त्वेनमनुवर्त्तन्ते क्लिश्यमानं स्वकर्म्मणा।
न तन्निमित्तः क्लेशोऽसौ न ह्यस्ति कृतकृत्यता" ॥

इति चरके निदानस्थाने सप्तमोऽध्यायः॥ * ॥

चिकित्साविशेष आगन्तून्मादकारणलक्षणविशेषश्च।

"समूढ़चेता न सुखं न दुःखं
नाचारधर्म्मौ कुत एव शान्तिम्।
विन्दत्यपास्तस्मृतिबुद्धिसंज्ञो
भ्रमत्ययञ्चेत इतस्ततश्च॥
समुद्भ्रमं बुद्धिमनःस्मृतीना-
मुन्मादमागन्तुनिजोत्थमाहुः" ॥

"देवर्षि-गन्धर्व्व-पिशाच-यक्ष-
रक्षःपितॄणामभिधर्षणानि।
आगन्तुहेतुर्नियमव्रतादि-
मिथ्याकृतं कर्म्म च पूर्ब्बदेहे" ॥

"अदूषयन्तः पुरुषस्य देहं
देवादयः स्वैस्तु गुणप्रभावैः।
विशन्त्यदृश्यास्तरसा यथैव
छायातपौ दर्पणसूर्य्यकान्तौ॥
आघातकालास्तु सपूर्ब्बरूपाः
प्रोक्ता निदानेऽथ सुरासुराद्यः।
उन्मादरूपाणि पृथक् निबोध
कालञ्च गम्यान् पुरुषांश्च तेषाम्" ॥

तद्यथा,—सौम्यदृष्टिं गम्भीरमप्रधृष्यमकोपनमस्वप्नमभोजनाभिलाषिणमल्पस्वेदमूत्रपुरीषवातं शुभगन्धं फुल्लपद्मवदनमिति देवोन्मत्तं विद्यात्॥

गुरुवृद्धसिद्धर्षीणामभिशापाभिचाराभिध्यानानुरूपचेष्टाहारव्याहारं तैरुन्मत्तं विद्यात्॥

अप्रसन्नदृष्टिमपश्यन्तं निद्रालुं प्रतिहतवाचमनन्नाभिलाषारोचकाविपाकपरीतं पितृभिरुन्मत्तं विद्यात्॥

चण्डं साहसिकं तीक्ष्णं गम्भीरमप्रधृष्यं मुखवाद्य-नृत्य-गीतान्नपान-स्नान-माल्य-धूप-गन्ध-रक्त-वस्त्र-बलिकर्म्म-हास्य-कथायोगप्रियं शुभगन्धमिति गन्धर्व्वोन्मत्तं विद्यात्॥

असकृत् स्वप्नरोदनहास्यं नृत्य-गीत-वाद्य-कथान्नपान-स्नान-माल्य-धूप-गन्धरतिं रक्तविप्लुताक्षं द्विजातिवैद्यपरिवादिनं रहस्यभाषिणमिति यक्षोन्मत्तं विद्यात्॥

नष्टनिद्रमन्नपानद्वेषिणमनाहारमप्रतिबलिनं शस्त्रशोणितमांसरक्तमाल्याभिलाषिणं सन्तर्ज्जकमिति राक्षसोन्मत्तं विद्यात्॥

प्रहासनृत्यप्रधानं देवविप्रवैद्यद्वेषावज्ञाभिः स्तुतिवेदमन्त्रशास्त्रोदाहरणैः काष्ठादिभिरात्मपीड़नेन च ब्रह्मराक्षसोन्मत्तं विद्यात्।

अस्वस्थचित्तस्थानमनभिमानं नृत्यगीतहासिनं बद्धाबद्धप्रभाषिणं सङ्करकूटमलिनरथ्याचेलतृणाश्मारोहणरतिं भिन्नरूक्षवर्णस्वरं नग्नं विधावन्तं नैकत्र तिष्ठन्तं दुःखान्यावेदयन्तं नष्टस्मृतिं पिशाचोन्मत्तं विद्यात्॥

भूतादीनामावेशकालो यथा।

"तत्र शौचाचारं तपःस्वाध्यायकोविदं नरं प्रायः शुक्लप्रतिपदि त्रयोदश्याञ्च देवाः, पानशुचिविविक्तसेविनं धर्म्मशास्त्रश्रुतिकाव्यकुशलं प्रायः षष्ठीनवम्योर्ऋषयः, मातृ-पितृ-गुरु-वृद्ध-सिद्धाचार्य्योपसेविनं प्रायो दशम्याममावस्यायाञ्च पितरः, गन्धर्व्वास्तु स्तुतिगीतवादित्ररतिं परदार-गन्ध-माल्य-प्रिय-शौचाचार द्वादश्याञ्चतुर्द्दश्याञ्च,